International Journal of Multidisciplinary Horizon

ISSN: **3049-2017**
IJMH 2026; 3(3): 140-143
© 2026 IJMH
www.themultijournal.com
Received: 26-05-2026
Accepted: 19-06-2026
Publish : 22-06-2026

**शुभमकुमारपाण्डेयः**
शोधच्छात्रः
वेद विभागः, सं.वि.ध.वि.संकायः,
काशीहिन्दूविश्वविद्यालयः, वाराणसी

**Correspondence:**
**शुभमकुमारपाण्डेयः**
शोधच्छात्रः
वेद विभागः, सं.वि.ध.वि.संकायः,
काशीहिन्दूविश्वविद्यालयः, वाराणसी

# वेदार्थावबोधने स्वामिकरपात्रीवर्याणामभिनवचिन्तनम्

**शुभमकुमारपाण्डेयः**

**सारांश**

अस्मिन् शोधपत्रे वेदार्थावबोधने स्वामीकरपात्रीवर्याणाम् अभिनवचिन्तनस्य समीक्षात्मकं अध्ययनं कृतम् अस्ति। भारतीयपरम्परायां वेदाः सृष्टिक्रमस्य आद्यवाङ्मयरूपेण तथा धर्मसंस्कृतेः मूलाधाररूपेण स्वीकृताः सन्ति। वेदार्थव्याख्यायां प्राचीनभाष्यपरम्परायाः—विशेषतः यास्क, सायणादीनां—योगदानं संक्षेपेण निरूप्य, तेषां परम्परायाः अधिष्ठानेन स्वामीकरपात्रीवर्येण प्रदत्तस्य अभिनवदृष्टिकोणस्य विशदं विवेचनं कृतम्।

स्वामीकरपात्रीवर्यः वेदमन्त्राणां बहुविधार्थसम्भावनां स्वीकृत्य, तेषां यज्ञार्थं तथा अध्यात्मार्थं समन्वयेन व्याख्यायति। तस्य भाष्यपद्धतौ श्रौतसूत्राणां, ब्राह्मणग्रन्थानां, निघण्टु-निरुक्तादीनां च समुचितः उपयोगः दृश्यते। अनेन तेन वेदार्थस्य गूढत्वं प्रकाश्य, परम्परानुगुणं नूतनचिन्तनं प्रतिपादितम्।

अतः अस्य अध्ययनस्य निष्कर्षः यत् स्वामीकरपात्रीवर्यस्य वेदार्थचिन्तनं परम्परानुगुणं सत्त्वेऽपि अभिनवदृष्ट्या समन्वितं भवति, यत् आधुनिकवेदाध्ययने महत्त्वपूर्णं योगदानं ददाति।

**कुञ्जीशब्दाः (Keywords)**

वेदः, वेदार्थः, स्वामीकरपात्री, वेदभाष्यपरम्परा, मीमांसा, वेदाङ्गानि, श्रौतसूत्रम्, अध्यात्मव्याख्या

**आमुखम्**

भारतीयप्रत्ययानुसारं वेदाः सृष्टिक्रमस्य प्रथमवाक्यानि सन्ति। फलतः वेदाः भारतीयसंस्कृतेः मूलग्रन्थाः इति सिद्धाः भवन्ति। पाश्चात्यचिन्तकाः ऐतिहासिकदृष्टिकोणं स्वीकृत्य वेदान् विश्वस्य प्राचीन-तमग्रन्थरूपेण स्वीकृतवन्तः। अतः यदि वेदाः विश्वसंस्कृतेः उत्पत्तिः इति मन्यन्ते, तर्हि अतिशयोक्तिः नास्ति।

शाब्दिकगुणात् विश्लेषणे वेदशब्दः 'विद्–ज्ञाने' इति धातोः 'घञ्' प्रत्ययेन निष्पन्नः भवति। अतःविचारकैः उक्तम्—

**"वेद्यन्ते ज्ञाप्यन्ते धर्मादिपुरुषार्थचतुष्टयोपाया येन सः वेदः।"**[1]

आचार्यसायणेन वेदानां संज्ञानात्मकम् ऐश्वर्यं मनसि निधाय इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकसाधनं व्याख्यातम्—

**"इष्टप्राप्त्यनिष्टपरिहारयोः अलौकिकमुपायं यो ग्रन्थो वेदयति सः वेदः।"**

आचार्यैः सामान्यतया मन्त्रब्राह्मणरूपेण वेदाः विभक्ताः सन्ति—

**"मन्त्रब्रह्मणयोर्वेदनामधेयम्।"**[2]

वेदाः भारतीयधर्मस्य संस्कृतेश्च मूलकारणानि सन्ति। वेदावबोधप्रयासे ऋषिभिः वेदाङ्गानि—शिक्षा, कल्पः, व्याकरणम्, निरुक्तम्, छन्दः, ज्योतिषम्—प्रणीतानि। आस्तिकदर्शने विशेषतः मीमांसाया वेदान्तस्य च वेदार्थस्य गहनतया चर्चा भवति। रामायण–महाभारत–पुराणादिषु विविधकथानां माध्यमेन वेदार्थस्य विस्तारः कृतः अस्ति।

**वेदभाष्यपरम्परा (प्रारम्भ भाग)**

यास्काचार्यः ईशापूर्वसप्तमशताब्द्यां वेदव्याख्यानक्षेत्रे नूतनप्रवर्तकः मन्यते। निरुक्तादिवेदाङ्गद्वारा व्याख्यायाः सुदृढः आधारः तेन स्थापितः आसीत्। यद्यपि तेन कस्यापि वेदस्य सम्पूर्णभाष्यं न कृतम्, तथापि वेदार्थप्रक्रियायाः व्यापकं तथा समीचीनं विवेचनं तेन प्रस्तुतम्।

यास्कपूर्वे अपि अनेके महर्षयः अस्मिन् क्षेत्रे सक्रियाः आसन्। यथा—**आग्रायणः, औपमान्यवः, औदुम्बरायणः, और्णभावः, गार्ग्यः, क्रौष्टुकी** इत्यादयः। एतेषां मतानि यास्काचार्येण निरुक्ते उद्धृतानि सन्ति।

यास्कस्य परवर्तीकाले देशे बहवः सामाजिक-राजनीतिक-धार्मिक-परिवर्तनाः अभवन्, येन वेदाध्ययनपरम्परायामपि किञ्चित् अवरोधः उत्पन्नः। तथापि कालान्तरात् पुनः वेदभाष्यपरम्परायाः विकासः जातः। समग्रतया वेदभाष्यपरम्परा मध्ययुगीनकालात् अधिकतया प्रस्फुटिता दृश्यते।

अस्मिन् काले **स्कन्दस्वामी, उद्गीथः, नारायणमाधवभट्टः, वेङ्कटमाधवः, उव्वटः, आनन्दतीर्थः** इत्यादयः सायणाचार्यस्य पूर्ववर्ती वेदभाष्यकाराः सन्ति। एतेषां सर्वेषां प्रयत्नैः वेदभाष्यपरम्परायाः सुदृढीकरणं जातम्।

सायणाचार्यः वेदभाष्यक्षेत्रे अत्यन्तं महत्वपूर्णः आचार्यः मन्यते। तेन चतुर्णां वेदानां विस्तृतभाष्यं कृतम्, यत् अद्यापि वेदाध्ययनस्य प्रमुखाधाररूपेण स्वीकृतम् अस्ति।

पाश्चात्यविद्वांसः अपि अस्मिन् क्षेत्रे स्वस्वयोगदानं दत्तवन्तः। **विल्सन्, मैक्समूलरः, रॉथः, लुड्विग्, ग्रिफिथ्, मैक्डोनेल्** इत्यादयः वेदानां भाष्य, अनुवाद, तथा ऐतिहासिकविश्लेषणेषु संलग्नाः आसन्।

आधुनिकभारतीयवेदभाष्यकाराणां मध्ये **महर्षिदयानन्दः, स्वामीकरपात्री, योगीराजअरविन्दः, मधुसूदनओझा, सातवलेकरः तथा कपालीशास्त्री** इत्यादीनां नामानि विशेषतया उल्लेखनीयानि सन्ति। एते सर्वे स्वस्वदृष्टिकोणानुसारं वेदार्थस्य नूतनव्याख्यां प्रस्तुतवन्तः।

एवं प्रकारेण वेदभाष्यपरम्परा प्राचीनकालात् आरभ्य अद्यतनकालपर्यन्तं निरन्तरं विकासशीलतां दर्शयति।

**स्वामीकरपात्रीमहाराजः**

स्वामीकरपात्रीवर्यः आधुनिकयुगस्य प्रमुखेषु वेदार्थचिन्तकेषु अन्यतमः आसीत्। सः पूर्वाचार्याणां भाष्यपरम्परां सम्यगवलम्ब्य, पूर्वीय-पाश्चात्यविचारधाराणां सम्यक् समीक्षणं कृत्वा, वेदानां नूतनं तथा गूढं अर्थचिन्तनं प्रस्तुतवान्।

उत्तरप्रदेशस्य प्रतापगढमण्डलस्य भटनीग्रामे श्रावणमासे शुक्लपक्षस्य द्वितीयायां तिथौ विक्रमसंवत् १९६४ (१९०७ ई.) तस्य जन्म अभवत्। तस्य पितुः नाम रामनिधिओझा तथा मातुः नाम शिवरानी आसीत्। सः सनातनधर्मी सरयूपारीणब्राह्मणकुले जातः।

बाल्ये तस्य नाम 'हरिनारायणः' आसीत्। संन्यासदीक्षायाः अनन्तरं तस्य नाम 'हरिहरानन्दसरस्वती' अभवत्। किन्तु सः **'करपात्री'** इति नाम्ना एव प्रसिद्धः अभवत्, यतः सः **स्वस्य करौ** एव पात्ररूपेण उपयुञ्जानः आसीत्।

(कर = हस्तः, पात्र = पात्रम् → करपात्री = यस्य करः एव पात्रम्)।

सः केवलं धार्मिकक्षेत्रे एव न, अपितु सामाजिक-राजनीतिकक्षेत्रे अपि सक्रियः आसीत्। तेन **'अखिलभारतीयरामराज्यपरिषद्'** इति राजनैतिकदलं स्थापितम्। धर्मशास्त्रेषु तस्य गाढविद्वत्त्वं दृष्ट्वा तस्मै 'धर्मसम्राट्' इति उपाधिः प्रदत्ता।

**स्वामीकरपात्रीकृताः ग्रन्थाः**

स्वामीकरपात्रीवर्येण बहवः वेदसम्बन्धिनः तथा दार्शनिकग्रन्थाः रचिताः। तेषु प्रमुखाः—

- **वेद का स्वरूप तथा प्रामाण्य (द्वे भागे)**
- **वेदप्रामाण्यमीमांसा**
- **वेदस्वरूपविमर्शः**
- **वेदार्थपरिजातः (भागद्वयम्)**
- **शुक्लयजुर्वेदसंहिता (करपात्रभाष्यसमन्विता)**

अन्येषु ग्रन्थेषु—

- **मार्क्सवादः रामराज्यश्च**
- **रामायणमीमांसा**
- **चातुर्वर्ण्यसंस्कृतिविमर्शः**
- **भक्तिसुधा**

इत्यादयः अपि तस्य वैदिकदृष्टिकोणस्य द्योतकाः सन्ति।

**भाष्यपद्धतिः**

स्वामीकरपात्रीवर्याणां वेदार्थव्याख्याने विशिष्टा पद्धतिः दृश्यते। तस्य भाष्यस्य प्रमुखा विशेषता एषा यत् सः आदौ कात्यायनश्रौतसूत्रस्य तथा तद्भाष्यस्य आधारेण मन्त्रविनियोगं निरूपयति।

अस्मिन् सन्दर्भे अपस्तम्बश्रौतसूत्रस्य, तैत्तिरीयसंहितायाः, तैत्तिरीयब्राह्मणस्य च प्रमाणानि अपि यथास्थानं प्रदत्तानि सन्ति। ततः परं कात्यायनस्य सर्वानुक्रमणीनुसारं प्रत्येकस्य मन्त्रस्य ऋषिः, देवता, छन्दः च निर्दिश्यते।

छन्दसां विवेचने पिङ्गलछन्दशास्त्रस्य अपि अपेक्षितं साहाय्यं गृह्यते।

मन्त्रार्थव्याख्याने उव्वट, सायण, महीधर इत्येतयोः भाष्याणि यथायोग्यं उद्धृतानि दृश्यन्ते। स्तोमप्रकरणे सामसूत्रस्य उपयोगः कृतः अस्ति।

विशिष्टवैदिकशब्दानां विवेचने निघण्टु-निरुक्तयोः तथा दुर्गाचार्यकृतनिरुक्तभाष्यस्य उपयोगः दृश्यते। देवराजयज्वा तथा स्कन्दस्वामिनः व्याख्यानानि अपि अत्र सन्दर्भतः उपयुज्यन्ते।

**अमरकोशः, विश्वप्रकाशः, मेदिनीकोशः, कल्पद्रुमः, अनेकार्थसंग्रहः, हैमकोशः इत्यादयः कोशग्रन्थाः** अपि यथास्थानं उद्धृताः सन्ति।

एवं सः पूर्वाचार्याणां—उव्वट, महीधर, सायण इत्यादीनां—भाष्यानां समुचितं समन्वयं कृत्वा स्वीयं भाष्यं निर्माति।

स्वामीकरपात्रीवर्यस्य स्पष्टं मतम्—

**संहिताभागवत् ब्राह्मणभागः अपि वेदस्य अनिवार्यः अङ्गः अस्ति। अतः—**

**"मन्त्रब्राह्मणयोः वेदाः"** इति तस्य दृढः अभिप्रायः।

तस्य शुक्लयजुर्वेदभाष्ये मन्त्रार्थस्पष्टीकरणाय ब्राह्मणग्रन्थानां, श्रौतसूत्राणां, उपनिषदां, स्मृतिग्रन्थानां, रामायण-पुराणादीनां च व्यापकः उपयोगः कृतः अस्ति।

**वेदार्थावबोधने अभिनवचिन्तनम्**

स्वामीकरपात्रीवर्यः वेदार्थचिन्तने अभिनवदृष्टिकोणं प्रस्तुतवान्। सः मन्यते यत् वेदमन्त्राः बह्वर्थकाः भवन्ति। यदि लौकिकवाक्यानि अपि बहुविधान् अर्थान् दातुं समर्थानि सन्ति, तर्हि अलौकिकस्वरूपाणां वेदमन्त्राणां बहुविधार्थत्वे किम् आश्चर्यम्?

तस्यैव अभिप्रायः—

**"त एते वक्तुरभिप्रायवशादर्थान्यथात्वमपि भजन्ते मन्त्राः।**

**न ह्येष्वर्थेषु इयत्तावधारणमस्ति। महार्था ह्येते दुष्परिज्ञानाश्च।"**[3]

अर्थात्—मन्त्राणां अर्थाः वक्तृविशेषेण परिवर्तन्ते। तेषां अर्थानां निश्चितपरिमाणं नास्ति।

अग्रे सः उदाहरणेन स्पष्टीकरोति—

यथा अश्वारोहणकुशलतायाः भेदेन अश्वः साधु साधुतरं वहति, तथैव वक्तृवैशेष्येण मन्त्राः अपि श्रेष्ठतरान् अर्थान् प्रकाशयन्ति।

अतः— **अध्यात्मिक, आधिदैविक, अधिभौतिक**—एतेषु सर्वेषु स्तरषु यावन्तः अर्थाः सम्भवन्ति, ते सर्वे अपि ग्राह्याः।

किन्तु सः एकं महत्वपूर्णं नियमं निर्दिशति— **"मुख्यतात्पर्यं न विरुद्धम् भवेत्"** अन्यार्थाः तदनुगुणाः एव स्वीकरणीयाः अन्यथा वेदवाक्यानां परस्परविरोधः उत्पद्येत, यः वेदप्रामाण्यस्य नाशकः स्यात्।

**मन्त्रव्याख्यानस्य उदाहरणम्**

शुक्लयजुर्वेदस्य द्वितीयाध्यायस्य प्रथममन्त्रः—

**"कृष्णोऽस्याखरेष्ठोऽग्नये त्वा जुष्टम्प्रोक्षामि**
**वेदिरसि बर्हिषे त्वा जुष्टाम्प्रोक्षामि**
**बर्हिरसि स्रुग्भ्यस्त्वा जुष्टम्प्रोक्षामि॥"**

**(१) सामान्यव्याख्या (यज्ञार्थः)**

हे इध्म! त्वं यज्ञीयकाष्ठरूपेण अग्नेः साधनं असि। अग्नये प्रियत्वात् तुभ्यं जलेन प्रोक्षणं क्रियते।

हे वेदि! त्वं देवतापूजनस्य अधिष्ठानं असि, अतः तव शुद्ध्यर्थं प्रोक्षणं क्रियते।

हे बर्हिः! त्वं यज्ञकर्मणि उपयुक्तं कुशरूपद्रव्यं असि, अतः तव अपि शुद्ध्यर्थं प्रोक्षणं क्रियते।

एवं यज्ञकर्मणि उपयुक्तानां द्रव्याणां शुद्धिकर्म अत्र प्रतिपादितम्।

**(२) श्रौतसूत्राधारितव्याख्या**

कात्यायनश्रौतसूत्रे—**"इध्मं प्रोक्षति विस्रंस्य वेदिं च बर्हिः प्रतिगृह्य..."**[4]

इति सूत्रानुसारं अध्वर्यु यज्ञभूमौ स्थापितानां द्रव्याणां विधिपूर्वकं प्रोक्षणं करोति।

**(३) स्वामीकरपात्रीमते अध्यात्मव्याख्या**

अत्र स्वामीकरपात्रीवर्यः अत्यन्तं गूढं अध्यात्मार्थं प्रदर्शयति—

- **कृष्णः = परब्रह्म / आनन्दरूपः जीवः**
- **अखरेष्ठः = कठोरब्रह्माधिष्ठानस्थितः**
- **अग्निः = परमात्मा**

अतः— "त्वा प्रोक्षामि" = कर्मोपासनया आत्मशुद्धिः, वेदिः = चित्तभूमिः, बर्हिः = चिदाकाशः,

स्रुचः = इन्द्रियशक्तयः

एवं प्रकारेण—

यज्ञक्रियायाः प्रत्येकं तत्वं आध्यात्मिकमार्गस्य प्रतीकत्वेन व्याख्यातम्।

गीतातः अपि समर्थनम्—"देवान् भावयतानेन ते देवा भावयन्तु वः..."[5]

अर्थात्— परस्परसमन्वयेन आध्यात्मिकविकासः सम्भवति।

**महत्वम्**

अनेन उदाहरणेन स्पष्टं भवति—

१. स्वामीकरपात्रीवर्यः केवलं यज्ञार्थे न तिष्ठति

२.अपि तु प्रत्येकमन्त्रे **आध्यात्मिकगूढार्थं उद्घाटयति**

एषः एव तस्य अभिनवयोगदानम्।

**वेदाङ्गानां महत्वम्**

वेदार्थावबोधप्रयासे महर्षिभिः वेदाङ्गानि अत्यन्तं महत्त्वपूर्णानि निर्दिष्टानि सन्ति। वेदस्य सम्यगधिगमाय एतेषां ज्ञानम् अनिवार्यम् अस्ति।

शिक्षाग्रन्थेषु वेदाङ्गानां स्वरूपं निम्नप्रकारेण निरूपितम्—

**छन्दः पादौ तु वेदस्य, हस्तौ कल्पः प्रकीर्तितः।**
**ज्योतिषामयनं चक्षुः, निरुक्तं श्रोत्रमुच्यते॥**
**शिक्षा घ्राणं तु वेदस्य, मुखं व्याकरणं स्मृतम्।**
**तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते॥**[6]

अर्थात्—छन्दः वेदस्य पादौ, कल्पः हस्तौ, ज्योतिषं चक्षुः, निरुक्तं श्रोत्रम्, शिक्षा घ्राणम्, व्याकरणं मुखम् इव कार्यं करोति।

अतः— वेदस्य सम्यगधिगमाय षट् वेदाङ्गानां अध्ययनम् अनिवार्यम्।

**इतिहास-पुराणयोः योगदानम्**

वेदार्थस्य सम्यगवबोधाय इतिहास-पुराणयोः अपि विशेषमहत्त्वम् अस्ति।

**इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्।**
**बिभेत्यल्पश्रुताद्वेदो मामयं प्रहिणोति इति॥**[7]

अर्थात्—

इतिहासपुराणाभ्यां वेदस्य अर्थः विस्तारितः भवति। अल्प-ज्ञानयुक्तः व्यक्ति वेदस्य यथार्थं न ज्ञातुं शक्नोति।

एवमेव यास्काचार्येण निरुक्ते उक्तम्—

**विद्या ह वै ब्राह्मणमाजगाम, गोपाय मां शेवधिष्टेऽहमस्मि।**
**असूयकायानृजवेऽयताय न मा ब्रूयाः वीर्यवती तथा स्याम्॥**[8]

अर्थात्—विद्या स्वयं योग्यं पात्रं वाञ्छति। अयोग्येभ्यः तस्य उपदेशः न कर्तव्यः।

**समन्वयदृष्टिः**

यदि वयं स्वामीकरपात्रीवर्यस्य भाष्याणि पश्यामः, तर्हि स्पष्टं भवति यत्—

सः श्रुति, स्मृति, पुराण, इतिहास, दर्शनशास्त्राणि च सम्यक् समन्वयेन उपयुञ्जते।

तस्य भाष्ये— परम्परानुगमनम्, तर्कसंगतता,आध्यात्मिकगाम्भीर्यम् एते सर्वे गुणाः सम्यक् दृश्यन्ते।

**निष्कर्षः**

एवं प्रकारेण स्वामीकरपात्रीवर्येण प्रस्तुतं वेदार्थचिन्तनं परम्परानुगुणं सत्त्वेऽपि अभिनवदृष्ट्या युक्तम् अस्ति।

तस्य चिन्तनस्य मुख्यबिन्दवः—

- **वेदाः धर्मब्रह्मप्रतिपादकाः सन्ति**
- **मन्त्रब्राह्मणयोः समन्वयः अनिवार्यः**
- **श्रौतसूत्राधारितव्याख्या अपेक्षिता**
- **आध्यात्मिकव्याख्या अपि तदनुगुणा भवेत्**

अधुनिकविचारधारायाः प्रभावेण यः स्वमताधारितो वेदव्याख्यान-प्रवाहः दृश्यते, सः सर्वथा असंगतः इति स्वामीकरपात्रीवर्यस्य मतम्।

अतः—स्वामीकरपात्रीवर्यस्य वेदभाष्यक्षेत्रे योगदानं न केवलं महत्त्वपूर्णम्, अपितु सनातनवेदपरम्परायाः संरक्षणे प्रेरणादायकम् अपि अस्ति।

तस्य कृतित्वेन परवर्तीविद्वांसः अपि वेदार्थचिन्तने प्रेरिताः भवन्ति।

**सन्दर्भग्रन्थसूची**


1. **उपाध्याय, बलदेव.** (2014). वैदिक साहित्य और संस्कृति. शारदा संस्थान.
2. **करपात्री, स्वामी.** (1979). वेदार्थपारिजात. श्रीराधाकृष्ण धानुका प्रकाशन संस्थान.
3. **करपात्री, स्वामी.** (1987). शुक्लयजुर्वेदसंहिता (स्वामी करपात्रभाष्य सहित). राधाकृष्ण धानुका प्रकाशन संस्थान.
4. **द्विवेदी, कपिलदेव.** (2012). वैदिक साहित्य का इतिहास. विश्वविद्यालय प्रकाशन.
5. **दुर्गाचार्य. (1918).** निरुक्त-टीका. आनन्दाश्रम संस्कृत ग्रन्थावली.
6. **पाठक, जगन्नाथ.** (1982). सायणाचार्यकृत ऋग्वेदभाष्य-भूमिका. चौखम्बा विद्याभवन.
7. **पाठक, जमुना.** (सं.). (1988). आपस्तम्ब श्रौतसूत्रम् (रुद्रदात्तीयवृत्ति एवं 'शशिप्रभा' हिन्दी टीका सहित). चौखम्भा संस्कृत सीरीज कार्यालय..
8. **मिश्र, देवेन्द्रप्रसाद.** (सं.). (2015). कात्यायनश्रौतसूत्रम् (कात्यायनीव्याख्या, सरलावृत्ति एवं भगवतीव्याख्या सहित). चौखम्बा सुरभारती प्रकाशनम्.
9. **यास्काचार्य. (1999).** निरुक्तम्. मेहरचन्द लक्ष्मणदास पब्लिकेशन्स.
10. **श्रीमद्भगवद्गीता**. गीता प्रेस गोरखपुर.
11. **शास्त्री, जगदीशचन्द्र**. (1987). शुक्लयजुर्वेदसंहिता. मोती-लाल बनारसीदास.
12. **द्विवेदी, प्रो.पारसनाथ** . (2017). वैदिक साहित्य का इतिहास. चौखम्बा सुरभारती प्रकाशनम्.


**पाद टिप्पणी -**

1. कात्यायन श्रौतसूत्र पृष्ठ संख्या ४
2. आपस्तम्ब परिभाषा ३१
3. शुक्लयजुर्वेदकरपात्रभाष्य १/१
4. कात्यायनश्रौतसूत्र २/७/१६
5. श्रीमद्भगवद्गीता ३/११
6. पाणिनि शिक्षा ४१-४२ श्लोक
7. सायणकृत ऋग्वेद भाष्य भूमिका, वेदभाष्य प्रकरण
8. निरुक्त २/४